**अभ्यासप्रश्नपत्रम् 4. – 2020-21**

**Practice Test 4**

**कक्षा – द्वादशी (XII)**

**संस्कृतम् (केन्द्रिकम्) कोड सं.- (322)**

**समयः – होरात्रयम्** **पूर्णांकाः – 80**

*कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 13 पृष्ठानि सन्ति |
*कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रमुखाः प्रश्नाः सन्ति |
*अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति | अस्मिन् कालावधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् |

**प्रश्नपत्रस्वरूपम् –**

**अ – भागः बहुविकल्पात्मकः 40 अङ्काः**

**आ – भागः वर्णात्मकः 40 अङ्काः**

(i) अस्मिन् पत्रे द्वौ भागौ स्तः |

(ii) अ–भागः बहुविकल्पात्मकः अस्ति |

(iii) आ–भागः वर्णनात्मकः अस्ति |

(iv) उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः |

(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया |

(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि |

(vii) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः |

## अ भागः

**बहुविकल्पात्मकाः प्रश्नाः 40 अङ्काः**

## अनुप्रयुक्तव्याकरणम्

1.अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संधिपदं संधिविच्छेदं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम्) 1x6=6

(i) आचार्योऽन्तेवासिनम् अनुशास्ति।

(क)आचार्यो + अन्तेवासिनम्

(ख) आचार्य + ओन्तेवासिनम्

(ग) आचार्यः + अन्तेवासिनम्

(ii) वनगमननिवृत्तिः पार्थिवस्य+एव तावत् |

(क)पार्थिवस्येव

(ख) पार्थिवस्यैव

(ग) पार्थिवस्याव

(iii) शैशवेऽभ्यस्तविद्यानां रघूणाम् अन्वयं वक्ष्ये |

(क) शैशवे+अभ्यस्तविद्यानां

(ख) शैशवेऽभ्यस्त+विद्यानां

(ग) शैशवे+ऽभ्यस्तविद्यानां

(iv)अवसरः+अयम् आत्मानं प्रकाशयितुम् |

(क) अवसरोऽयम्

(ख) अवसरयम्

(ग) अवसरोऽअयम्

(v) अल्पज्ञ एव पुरुषः प्रलपत्यजस्रम् |

(क) प्रलपत्य+जस्रम्

(ख) प्रलपति+अजस्रम्

(ग) प्रलपत+अजस्रम्

(vi) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।

(क) भूत्य+अर्थम्

(ख) भूत+अर्थम्

(ग) भूति+अर्थम्

(vii) अन्यैः नृपैः न+उपपादितम् |

(क) नुपपादितम्

(ख) नोपपादितम्

(ग) नउपपादितम्

2.अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत-(केवलं प्रश्नपञ्चकम्) 1x5=5

(i) विवाहबन्धनं स्वीकर्तुं न इच्छामि |

(क)विवाहात् बन्धनम्

(ख) विवाहस्य बन्धनम्

(ग) विवाहेन बन्धनम्

(ii) अभयं सत्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः |

(क)सत्वस्य संशुद्धि:

(ख) सत्वे संशुद्धि:

(ग) सत्वात् संशुद्धि:

(iii) यक्ष्ये दास्यामि इति अज्ञानविमोहिता: |

(क)अज्ञानी विमोहिता:

(ख) अज्ञानेन विमोहिता:

(ग) अज्ञानता च विमोहिता च

(iv) तत्किमपि यथेच्छं पृच्छ |

(क)इच्छाया: अनुसारेण

(ख) यथा इच्छा

(ग) इच्छाम् अनतिक्रम्य

(v) परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः |

(क)पतिः च पत्नी च

(ख) पति च पत्नयौ च

(ग) पती च पत्नयौ च

(vi) अपण्डितानां अज्ञताया: छादनं स्वायत्तम् एकान्तगुणम्।

(क)स्व आयत्तम्

(ख) स्वस्मिन् आयत्तम्

(ग) स्वस्य आयत्तम्

(vii) आत्मनो वधयोजनां ज्ञात्वा भोज: किमपि वत्सराजं कथितवान् |

(क)वधस्य योजनाम्
(ख) वधाय योजनाम्
(ग) वधे योजनाम्

3.अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्य: चिनुत- (केवलं प्रश्नषट्कम्) 1x6=6

(i) कर्माणि आरभमाणं पुरुषं श्रीर्निषेवते |

(क)) आ+रभ्+क्तवतु

(ख) आ+रभ्+शानच्

(ग) ) आ+रभ्+शतृ

(ii) राजाज्ञा पालनीया एव।

(क)पालनीय+टाप्

(ख) पालनीय+आ

(ग)पालनी+या

(iii) वस्तुतः रूपं <u>विद्यावताम्</u> |

(क)विद्या+वत्

(ख) विद्या+मत्

(ग) विद्या+मतुप्

(iv)इत्यासीद् गुरुपादानां मतम् |

(क)मन्+क्त

(ख) मन्+तम्

(ग) मत+अम्

(v)एकाकिनी एव नर्तिष्यसि |

(क)एकाकी+इनी

(ख) एकाकिन्+ङीप्

(ग) एकाकिन्+ई

(vi) अभिजातस्य सत्यम् <u>अलोलुपत्वम्</u> इति दैवी संपदं भवन्ति |

(क)अलोलुप+त्वम्

(ख) अलोलुप+तव

(ग) अलोलुप+त्व

(vii) प्रक्रितिसौन्दर्यम् <u>अवलोकयन्</u> शत्रुजितः प्रविशति |

(क)अव+लोक्+शतृ
(ख) अव+लोक्+यन्
(ग) अवलोक+शतृ

4.समुचितं उपपदविभक्तिरूपं चिनुत-(केवलं प्रश्नत्रयम्) 1x3=3

(i) .......... न प्रमदितव्यम् |

(क)स्वाध्यायात्

(ख) स्वाध्यायस्य

(ग) स्वाध्येन

(ii) .......... शिक्षणं प्रदास्यामि |

(क)शिशून्

(ख) शिशूणाम्

(ग) शिशुभ्य:

(iii) ……… सह सीता वनं गन्तुम् इच्छति |

(क) रामेण

(ख) रामस्य

(ग) रामाय

(iv) ………. समीपम् आगत्य दौवारिक: उवाच |

(क) दीपेषु
(ख) दीपम्
(ग) दीपस्य

## पठितावबोधनम्

5.भाषिककार्यम् – निदेशानुसारम् उत्तराणि चिनुत- (केवलं प्रश्नषट्कम्) 1x6=6

(i) "पञ्चवार्षिक: भोजः" मुञ्जस्य क्रोडे आसीत्।अत्र विशेषणपदं किम्?

(क) भोजः

(ख) पञ्चवार्षिक:

(ग) क्रोडे

(ii) "न वयं दौवारिका: ब्रह्मणोऽपि आज्ञां प्रतीक्षामहे" अत्र "वयम्" इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) दौवारिकेभ्य:

(ख) सन्यासिभ्य:

(ग) शिववीराय

(iii) "श्रीराम नाम मधुरं मधुरं क्वणन्त:" अत्र 'कटु' इत्यस्य विलोमपदं किम्?

(क) राम

(ख) मधुरम्

(ग) नाम

(iv) "तदुत्संगे भोजमात्मानं मुमोच" अत्र 'क्रोड़े' इत्यस्य पर्यायपदं किम्?

(क) उत्संगे

(ख) आत्मानम्

(ग) मुमोच

(v) "केवलं महाराजशिववीरस्याज्ञां वयं शिरसा वहामः" अत्र क्रियापदं किम्?

(क) वयम्

(ख) शिरसा

(ग) वहामः

(vi) "दत्तमपि राज्यं वृथा" अत्र विशेष्यपदं किम्?

(क) दत्तम्

(ख) राज्यम्

(ग) वृथा

(vii) "यथा अहं पश्यामि पुरुष: स्वभार्यायां स्वाधिपत्यं स्थापयति" अत्र कर्तृपदं किम्?

(क) अहम्

(ख) पश्यामि

(ग) यथा

6.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं समुचितम् उत्तरं चिनुत-(केवलं प्रश्नचतुष्टयम्) 1x4=4

(i)शरीरे अरि: प्रहरति। |

(क) हृदयम्

(ख) शत्रु:

(ग) मित्रम्

(ii) यानि अनवद्यानि कार्याणि त्वया सेवितव्यानि |

(क) अनिन्दितानि

(ख) अवार्याणि

(ग) आवश्यकानि

(iii) मदालसे !तूष्णीं किमर्थं तिष्ठसि |

(क) क्रोधः

(ख) सुप्तः

(ग) मौनम्

(iv) श्लोकमिमम् अधीत्य मुञ्ज: शोकाकुल: जात:|

(क) अधिकारं कृत्वा

(ख) पठित्वा

(ग) व्याकुल: भूत्वा

(v)तदन्वये शुद्धिमति प्रसूत: शुद्धिमत्तर:।

(क) तस्य वंशे

(ख)तस्य अनुरोधे

(ग)तस्य अपमाने

**संस्कृतसाहित्येतिहासपरिचयः**

7. समुचितस्य कवेः रचनायाः वा चयनं कुरुत-(केवलं प्रश्नत्रयम्) 1x3=3

(i) "रघुवंशस्य" रचयिता कः?

(क) भासः

(ख) भारविः

(ग) कालिदासः

(ii) भासेन कः ग्रन्थ: रचितः?

(क) प्रतिमानाटकम्

ख) शिवराजविजयम्

(ग) भोजप्रबन्ध:

(iii) अम्बिकादत्तव्यासस्य रचना का अस्ति?

(क) अभिज्ञानशाकुन्तलम्

(ख) पञ्चतन्त्रम्

(ग) शिवराजविजयम्

(iv) "पुरन्ध्रीपञ्चकम्" इत्यस्य लेखिका का?

(क) पण्डिता क्षमाराव
(ख) वेद कुमारी घई
(ग) प्रवेश सक्सेना

8.गद्य-पद्य-नाटक-विधानां समुचितं वैशिष्ट्यं चिनुत-

(केवलं प्रश्नत्रयम्) 1x3=3

(i) ........ अभिनयस्य प्राधान्यं भवति |

(क) पद्यकाव्ये

(ख) गद्यकाव्ये

(ग) नाट्ये

(ii) .......... लयात्मकता भवति |

(क) पद्यकाव्ये

(ख) गद्यकाव्ये

(ग) नाट्ये

(iii). दीर्घसमासानां प्रयोगं भवति।

(क) पद्यकाव्ये

(ख) गद्यकाव्ये

(ग) नाट्ये

(iv) गद्यकाव्यस्य .......... भेदौ स्तः |

(क)एकः

(ख) द्वौ

(ग) त्रयः

9.गद्य-पद्य-चम्पू-विधानां समुचितम् उत्तरं चिनुत-

(केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) गद्यकाव्यं कीदृशं भवति?

(क) छन्दोरहितम्

(ख) छन्दोयुक्तम्

(ग) छन्दोसहितम्

(ii) महाकाव्यं कस्य भेदः अस्ति?

(क) गद्यकाव्यस्य

(ख) पद्यकाव्यस्य

(ग) चम्पूकाव्यस्य

(iii) गद्यपद्यमयं काव्यं भवति?

(क) गद्यकाव्यम्

(ख) पद्यकाव्यम्

(ग) चम्पूकाव्यम्

(iv) मात्राणाम् अक्षराणां निश्चिता संख्या कस्मिन् काव्ये भवति?

(क) गद्यकाव्ये

(ख) पद्यकाव्ये

(ग) चम्पूकाव्ये

(v) “कवीनां निकषं किं भवति?

(क) गद्यम्

(ख) पद्यम्

(ग) चम्पू

## आ-भागः

### वर्णनात्मकाःप्रश्नाः अङ्काः – 40

### अपठितावबोधनम्

10. अधोलिखितं गद्यांशं पठित्वा दत्त-प्रश्नान् संस्कृतेन उत्तरत- 10

अद्य सम्पूर्ण: विश्व:कोरोना-भयेन आक्रान्त: अस्ति। अयं रोग: एकेन सूक्ष्मेन विषाणुना भवति। रोगग्रस्तेन जनेन सह सम्पर्केण स्वस्था: अपि रुग्णा: भवन्ति। अतः अस्माभि:केनापि सह हस्तमेलनं न करणीयम्,सर्वदा मुखच्छादनं नासिका-छादनं च करणीयम्।गृहात् बहि: न गन्तव्यम्।कमपि गृहाभ्यन्तरं न प्रवेष्टव्यम्।
अत्यावश्यक कार्येण एव बहि: गन्तव्यम्।सदैव उष्णजलस्य सेवनं करणीयम्। संयमित- भोजनेन व्यायामेन च रोग-प्रतिरोधक- क्षमता वर्धनीया। पूर्णपिधाननियमानां पालनं करणीयम्।दैववशात् गृहे कोऽपि संक्रमित: भवति चेत् एकस्मिन् प्रकोष्ठे एव स: वसेत्।तेन सह अन्येषां सम्पर्क: मा भवेत् इति ध्यातव्यम्।

(अ) एकपदेन उत्तरत –(केवलं प्रश्नचतुष्टयम्) ½x4=2

1.विश्व: केन आक्रान्त: अस्ति?

2.विषाणुना किं भवति?

3.कदा बहि: गन्तव्यम्?

4.रोगग्रस्तेन सह संपर्केण के रुग्णा: भवन्ति?
5.कीदृशं जलं सेवनीयम् ?

(आ)पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्) 2x2=4

(i) कथं रोग-प्रतिरोधक -क्षमता वर्धनीया ?

(ii) क:एकस्मिन् प्रकोष्ठे वसेत् ?

(iii) सर्वदा किं करणीयम् ?

(इ)गद्यांशस्य समुचितं शीर्षकं लिखत- 1x1=1

(ई)निर्देशानुसारम् उत्तरत –(केवलं प्रश्नत्रयम्) 1x3=3

(i) “अन्त:” इत्यस्य विलोमपदं किम् ?

(ii) “व्याधि:"इति पदस्य समानार्थकं पदं किम्?

(iii) "संपर्क: मां भवेत्" अत्र क्रियापदं किम् ?

(iv) "सूक्ष्मेण विषाणुना" अत्र विशेषणपदं किम् ?

**रचनात्मककार्यम्**

11.प्रधानाचार्यं प्रति अवकाशाय लिखितेऽस्मिन् प्रार्थनापत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्त-पदानां सहायतया पूरयत- ½x10=5

(i)...........

प्रधानाचार्यः (ii).............

राजकीय: सर्वोदयः विद्यालयः

देहली |

महोदयः

सविनयं निवेदनम् अस्ति यत् अहं (iii)..........जात: अस्मि। अत: विद्यालयम् आगन्तुम् (iv)........... अस्मि | कृपया (v).......... दिनत्रयस्य (vi)............ प्रदाय (vii).......... । एतदर्थम् (viii)......... भवत: (ix).......... स्थास्यामि |

धन्यवादः भवदीयः (x)...........शिष्य:

दिनाङ्कः संजयः

**मञ्जूषा**

( असमर्थ:, अहम्, सेवायाम्, कृतज्ञ:, कृतार्थीकुर्वन्तु, ज्वरग्रस्त:, आज्ञाकारी , अवकाशम्, मह्यम्, महोदयः )

12. मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत- ½x10=5

एकदा(i).---------एकः बालक:वृक्षस्य (ii)........ पठति स्म | तदैव तस्मात्(iii)......... एका वरयात्रा गच्छतिस्म | पठने संलग्न: बालक: तीव्रामपि(iv)..........न श्रुतवान् | एक: यात्री तस्य (v).......... गत्वा (vi).--------विषये किमपि अपृच्छत् | बालक: (vii)......... प्रदर्शितवान् | स: यात्री viii).......... ध्यानं दृष्ट्वा (ix)..........जात: | भवन्त: जानन्ति,तस्य नाम आसीत् (x)............ |

**मञ्जूषा**

( अनभिज्ञताम्, विस्मित:, वरयात्रिण:, डा.राजेन्द्र प्रसाद:, समीपम्, बालकस्य, वाद्यध्वनिम्, मार्गात्, छायायाम्, एकस्मिन् ग्रामे )

**अथवा**

अधोलिखिते संवादे रिक्तस्थानानि पूरयत- 1x5=5

शिक्षक: - सर्वे -------भूत्वा पुस्तकालये प्रविशन्तु ।

छात्रा: - ( पुस्तकालये आगत्य उपविशन्ति )

शिक्षक: - छात्रा: ! अत्र------ पुस्तकानि सन्ति , भवन्त: निजरुचि-अनुसारं------+ प्राप्तुं ------वदन्तु । स: भवद्भ्यः पुस्तकं प्रदास्यति ।

छात्र: -महोदय!--------कथाया: पुस्तकं यच्छतु येन आनन्दम् अनुभवानि।

मञ्जूषा-(तूष्णीम्,बहूनि,पुस्तकम्,पुस्तकालयाध्यक्षम्,मह्यम्)

13. "शिक्षाया: महत्त्वम्' इति विषयमधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं लिखत |        1x5=5
(मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् गृहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लेखितव्यम् |)

**मञ्जूषा**

(शिक्षया, जीवने, सफ़लताम्, प्राप्नोति, क्षुधा, कठिनसमये, कदापि, दु:खी, अलसाः, लभन्ते,, असफ़लताम्,)

**अथवा**

निम्नलिखितेषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं

कुरुत-(केवलं वक्यपञ्चकम्)        1x5=5

1.परिश्रमी व्यक्ति सफलता प्राप्त करते हैं|

Labourious men get success.

2.मां के साथ पुत्री बाजार जाती है |

Daughter goes to market with her mother.

3.शिक्षक छात्र को पुस्तक देते हैं|

Teacher gives books to children.

4.लड़कियां गीत गाती हैं |

Girls sing a song.

5.किसान लोगों को अन्न देते हैं |

Farmers provide food to the people.

6.हमें देश की रक्षा करनी चाहिये |

We must protect our country.

7.प्रदूषण बहुत बड़ा शत्रु है |

Pollution is a big enemy.

**पठितावबोधनम्**

14. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 3

संवृत्ते किञ्चिदन्धकारे भुशुण्डीं स्कन्धे निधाय आगतं -प्रत्यागतं च विदधान: प्रतापदुर्गदौवारिक: कस्यापि पादक्षेपध्वनिमिवाश्रौषीत्।तत: स्थिरीभूय पुरत: पश्यन् सत्यपि दीपप्रकाशे कमप्यनवलोकयन् गम्भीरस्वरेणैवमवादीत्-" क: कोऽत्र भो:? क: कोऽत्र भो:?इति।
अथ क्षणानन्तरं पुनः स एवपादध्वनिरश्रावीति भूय: साक्षेपमवोचत्-"क एष मामनुत्तरन् मुमूर्षु: समायाति बधिर:?
ततो-"दौवारिक! शान्तो भव,किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि?" इति वक्तारमपश्यतैवाकर्णि मन्द्रस्वरमेदुरा वाणी।

(अ) एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) ½x2=1

(i) दौवारिक: किं श्रुतवान् ?

(ii) क: पुरत: पश्यति स्म ?

(iii) दौवारिक: कीदृशीं वाणीं श्रुतवान् ?

(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नैकम्) 2x1=2

(i) कदा दौवारिक: आगतं प्रत्यागतं च करोति स्म ?

(ii) दौवारिक: स्वप्रश्नस्य किम् उत्तरं प्राप्तवान् ?

15. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 3

न दुर्जन: सज्जनतामुपैति शठ: सहस्रैरपि शिक्ष्यमाण:
चिरं निमग्नोऽपि सुधासमुद्रे न मन्दरो मार्दवमभ्युपैति।।

(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½x2=1

(i) दुर्जन: किम् न उपैति ?

(ii) क: मार्दवं न प्राप्नोति?

(iii) कै: शिक्ष्यमाण: शठ: सज्जन: न भवति ?

(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नैकम्) 2x1=2

i.क: सज्जनतां न उपैति?

ii.कुत्र निमग्न: मन्दर: मृदु: न भवति?

16. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 3

**कुण्डला** -सखि मदालसे! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि?
**मदालसा-** ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।
**कुण्डला-** विद्या ददाति विनयम् अतएव एवं भणसि। कुलगुरु तुम्बरु महाभागैस्तु गंधर्वराजाय अन्यदेव सूचितम्।
**मदालसा-**किं श्रुतं त्वया यत् गुरुवर्यै: मामधिकृत्य पित्रे कथितम्?
**कुण्डला-** अथ किम्! राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता ,परं तया स्वयं वर: न प्राप्त: अतः तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।
**मदालसा-** (हसित्वा) नहि जानन्ति ते यदहं विवाहबंधनं स्वीकर्तुं न इच्छामि।

(अ) एकपदेन उत्तरत-　　　　　　(केवलं प्रश्नद्वयम्)　　　　　　½x2=1

(i) क: अनन्तपार:  ?

(ii) का सर्वविद्यानिष्णाता जाता ?

(iii) मदालसा किं स्वीकर्तुं न इच्छति?

(आ) पूर्णवाक्येन उत्तरत-　　　　(केवलं प्रश्नैकम्)　　　　　　2x1=2

(i) कुलगुरु:मदालसाया: विषये किं कथयति ?

(ii) मदालसायै किं अन्वेषणीयम्  ?

17.अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषा-प्रदत्तपदैः पूरयित्वा पुनः लिखत-　　½x4=2

गुणी गुणं वेत्ति न वेत्ति निर्गुणः

बली बलं वेत्ति न वेत्ति निर्बलः |

पिको वसन्तस्य गुणं न वायसः

करी च सिंहस्य बलं न मूषकः ||

भावार्थः –

गुणीजनः अन्यस्य (i) .......... जानाति, गुणरहितः ज्ञातुं न शक्नोति यथा पिकः एव (ii) .......... माधुर्यं सौन्दर्यं च जानाति न तु काकः | एवमेव (iii) ......... एव बलिष्ठस्य जनस्य बलं वेत्ति यथा हस्तिः एव (iv) ........... बलं ज्ञातुं समर्थः भवति न तु मूषकः |

**मञ्जूषा**

( सिंहस्य, बलवान्, वसन्तस्य, गुणान् )

**अथवा**

प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-1x2=2

(1)“रोदितव्ये कालेसौमित्रिणा धनुर्गृहीतम् |”
(i) शोकस्य समये लक्ष्मण: युद्धाय तत्पर: अस्ति।
(ii) लक्ष्मण: रामस्य वनगमनं श्रुत्वा रोदिति |
(iii) सुमित्रा अपि वनं गच्छति |
(2) “अजीर्णे भेषजं वारि |”

(i) जलम् रोगवर्धकं भवति |

(ii) यदा भुक्तान्नं सम्यक् रूपेण न पच्यते तदा जलं औषधस्य कार्यं करोति |

(iii) भुक्तान्नं सम्यक् रूपेण न पच्यते तदा जलं हानिकारकं भवति |

18.अधोलिखित-अन्वये रिक्तस्थानानि पूरयत- ½x4=2

कर्णामृतं सूक्तिरसं विमुच्य

दोषेषु यत्न: सुमहान् खलानाम्।

निरीक्षते केलिवनं प्रविश्य
क्रमेलक: कण्टकजालमेव।।

अन्वय:-खलानां ----------- सूक्तिरसं विमुच्य दोषेषु ------- यत्न:(भवति) यथा क्रमेलक: --------- प्रविश्य कण्टकजालम् एव ---------।

**अथवा**

प्रश्नपत्रात् भिन्नं पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य भावार्थं लिखत। 2x1=2

19.'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत- ½x4=2

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (i) स्वायत्तमेकान्तगुणं विधात्रा। | (क)विद्यावतां वस्तुत एव रूपम् |
| (ii) रूपं प्रसिद्धं न बुधास्तदाहु: | (ख)स ताभ्यो बलिमग्रहीत्। |
| (iii) स पिता पितरस्तासां | ( ग)केवलं जन्महेतव:। |
| (iv)प्रजानामेव भूत्यर्थं | ( घ)विनिर्मितं छादनमज्ञताया:।।